## उदङ्कोऽनुदके। (१२३/३३०२)

उदङ्क इति निपात्यते अनुदकविषयश्चेद् धात्वर्थो [1]भवति। उत्पूर्वादञ्चतेः घञ् [2]निपात्यते। ननु च 'हलश्च' (३.३.१२१/३३००) इति [3]सिद्ध एव घञ्? [4]उदके प्रतिषेधार्थमिदं वचनम्। तैलोदङ्कः[5]। अनुदके इति किम्? उदकोदञ्चनः। घः कस्मान्न प्रत्युदाह्रियते? विशेषाभावात्। घञ्यपि थाथादिस्वरेण अन्तोदात्त एव॥

## जालमानायः। (१२४/३३०३)

आनायः इति निपात्यते जालं चेत् तद् भवति। आङ्पूर्वात् नयतेः करणे घञ् निपात्यते। आनायो मत्स्यानाम्। आनायो मृगाणाम्[6]॥

## खनो घ च। (१२५/३३०४)

खनतेः धातोः [7]करणाधिकरणयोः घः प्रत्ययो भवति। [8]चकारात् घञ् च। आखनः, आखानः।

[३२५] [9]डो वक्तव्यः। (म. भा. २.१५६)

आखः।

[३२६] डरो वक्तव्यः। (म. भा. २. १५६)

आखरः।

[३२७] इको वक्तव्यः। (म. भा. २. १५६)

आखनिकः।

[३२८] इकवको वक्तव्यः। (म. भा. २. १५६)

आखनिकवकः[10]॥

## ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्। (१२६/३३०५)

करणाधिकरणयोः [11]इति निवृत्तम्। ईषत् दुस् सु इत्येतेषु उपपदेषु कृच्छ्राकृच्छ्रार्थेषु धातोः खल् प्रत्ययो भवति। कृच्छ्रं दुःखम्, तद् दुरो विशेषणम्। अकृच्छ्रं सुखम्, तदितरयोः विशेषणम्, सम्भवात्। ईषत्करो भवता कटः। दुष्करः। सुकरः। ईषद्भोजः[12]। [13]दुर्भोजः। सुभोजः। ईषदादिषु इति किम्? कृच्छ्रेण [14]कार्यः कटः। कृच्छ्राकृच्छ्रार्थेषु इति किम्? [15]ईषत्कार्यः। लकारः स्वरार्थः। खित्करणमुत्तरत्र मुमर्थम्॥

---

1. भवति नास्ति फ. 2. निपात्यते नास्ति फ. 3. सिद्धमेव ग. 4. उदकप्रतिषेधार्थम् अ. 5. घृतोदङ्कः इत्यधिकम् क. ड. फ. ह. 6. जालमिति किम्? आनयः इत्यधिकम् अ. क. ड. 7. करणाधिकरणयोः नास्ति फ. 8. चकारात् नास्ति ब. 9. खनेर्डडरेकेकवका वाच्याः इति वार्तिकमत्र छिन्नम् इत्यधिकम् अ. ह. 10. खलः भगः पदं च इति वक्तव्यम् इत्यधिकम् ड. 11. च ब. 12. ओदनो भवता इत्यधिकम् अ. ब. क. फ. ड. ह. 13. दुर्भोजनः सुभोजनः फ. 14. कार्यम् क. फ. ह, कटः नास्ति अ. फ. 15. ईषत्कार्यम् फ.